दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ शिशिर-ऋतुः
सूर्यः उत्तरायणम् फाल्गुणकृष्णनवमी
माघ 28 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-110 | 1 | फरवरी 10, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 हिमाचलस्य बृहत्तमे चिकित्सालये उपचारः महार्घः, विशिष्टकक्षाणां (Special Ward) शुल्कं वर्धितम्; 'पैट स्कैन' तः 'एमआरआई' पर्यन्तं शुल्कानि निश्चितानि

3 टांडा-चिकित्सा-महाविद्यालयस्य 'टैमकोट' शिक्षकसङ्घेन अनुचितवेतनविषये असन्तोषः प्रकटितः, तत्कालसमीक्षायाः अभ्यर्थना च कृता

5 ।।श्रीरामाय नमः।। वाल्मीकिरामायणस्य बालकाण्डसमीक्षा

## प्रधानमन्त्रिणा नरेन्द्रमोदिना 'परीक्षा पे चर्चा' इति सम्वाद-कार्यक्रमे छात्रैः सह सम्वादः विहितः



**हिमसंस्कृतवार्ताः** - प्रधानमन्त्रिणा नरेन्द्रमोदिना 'परीक्षा पे चर्चा' इति लोकप्रिय-सम्वाद-कार्यक्रमस्य नवमसंस्करणान्तर्गतं छात्रैः सह सम्वादः विहितः। प्रधानमन्त्री परीक्षावधौ कथं अशान्तेः चिन्तायाः च मुक्तः भवेत् इति विषये सम्वादम् अकरोत् सहैव तेन छात्राः परीक्षायाः सुदूरं यावत् चिन्तनं विधातुं, जीवनकौशल-क्रीडा-रचनात्मकता-आत्म-विकासादिषु विषयेषु ध्यानं केंद्रितं कर्तुम् अपि प्रेरिताः। वार्तावधौ, श्रीमोदिना छात्राः स्टार्ट-अप् इति नवाचारैः सह स्वकीयोद्यमितायाः यात्रायाः शुभारम्भाय प्रोत्साहिताः। तेन प्रोक्तं यत् विशालाः विचाराः प्रायशः सूक्ष्मविचारैः एव उत्पद्यन्ते। शिक्षायाः रुचेः च मध्ये संतुलनं स्थापितुं, प्रधानमंत्री अकथयत् यत् छात्राः अध्ययनं रचनात्मक-गतिविधीन् च पृथक् रूपेण न पश्येयुः अपितु द्वे एव समान रूपेण मूल्यवत्यौ स्तः सहैव ते प्रभावात्मकरूपेण सन्तुलिते कर्तुं शक्येते। श्रीमोदी सबलं प्रोक्तवान् यत् कलात्मकरुचिः रचनात्मकरुचिः च छात्रान् अध्ययनावसादात् क्लान्तात् च निवारयितुं सहाय्यं प्रदातुं शक्येते। प्रधानमंत्रिणा नागरिकाः दायित्वपालनस्य महत्त्वविषये अपि प्रोदीरिताः। सः इतस्ततः अवकरं, मार्गेषु ष्ठीवनं च न कर्तुं सहैव ट्रैफिक सिग्नल इत्यस्य नियमानाम् अन्येषां आवश्यकनियमानां च पालनं कर्तुं छात्रान् प्रार्थयत्। सः अकथयत् यत् अनुशासित-दैनिक-व्यवहारः राष्ट्रनिर्माणे महत्वपूर्णा भूमिका निभालयति। श्रीमोदी एतत् वक्तव्यं सबलं प्रत्यपादयत् यत् अनुशासन-प्रेरणे एव अवश्यक्यौ स्तः। सः प्रोदीरितवान् यत् अनुशासनं विना, एकाकी प्रेरणा न प्रभावात्मिकी। प्रधानमन्त्री पुनः अकथयत् यत् अनुशासनं दिग्दर्शनङ्करोति अपरत्र प्रेरणा यात्रां सुदृढां करोति।


### छात्राः स्वकीये आजीविकानिर्धारणे टेक्नोलॉजी इत्यस्य प्रयोगः कुर्युः - प्रधानमन्त्री

किम् आर्टिफिशियल इंटेलिजेंस्-टेक्नोलॉजी इत्यनाभ्यां भीतिः समुत्पद्यते? अथवा छात्राः स्वकीये आजीविकानिर्धारणे टेक्नोलॉजी इत्यस्य प्रयोगः कथं कर्तुं शक्नुवन्ति? इति प्रश्नस्य प्रत्युत्तरं प्रयच्छन् प्रधानमन्त्री अकथयत् यत् टेक्नोलॉजी इत्यस्मात् भीत्याः आवश्यकता नास्ति अपितु छात्राः सुनिश्चयेयुः यत् ते टेक्नोलॉजी इत्यस्य स्वबुद्ध्या उपयोगं कुर्युः, अपि च तस्योपरि निर्भराः न भवेयुः।ध्यानास्पदं वर्तते यत् 'परीक्षा पे चर्चा' इति कार्यक्रमस्य उद्देश्यं परीक्षायाः अवसादं विरुध्य सम्वादः करणीयः अस्ति अपि च परीक्षा उत्सवरूपेण जीवनस्य अभिन्नाङ्गरूपेण च स्वीकरणीया अस्ति।

## प्रधानमन्त्रिणा नरेन्द्रमोदिना सेशेल्स-देशस्य राष्ट्रपतिना सह द्वैपाक्षिकी चर्चा कृता।

**हिमसंस्कृतवार्ताः** - प्रधानमन्त्री नरेन्द्रमोदी सेशेल्स-देशस्य कृते पञ्च-सप्तत्यधिक-एकशतम्-मिलियन डॉलर-मितस्य विशेष-आर्थिक साहाय्य-राशेः घोषणाम् अकरोत्। नवदेहल्यां सेशेल्स-देशस्य राष्ट्रपतिना डा. पैट्रिक हर्मिनी इत्यनेन सह संयुक्त-वार्ताहर-समेलनं सम्बोधयन् श्रीमोदी अवदत् यत् एतानि देयमूल्यानि सामाजिक-आवासं, ई-मोबिलिटी, व्यावसायिक-प्रशिक्षणं, स्वास्थ्यं, रक्षां, समुद्रीय सुरक्षां च समर्थयिष्यन्ति। स्वास्थ्यं, ऋतुविज्ञानं, इलेक्ट्रानिक्स् तथा सूचनाप्रौद्योगिकी, सुशासनेत्यादिषु विविधक्षेत्रेषु भारत-सेशेल्स-देशयोः मध्ये सप्तसु सहमति-पत्रेषु अपि हस्ताक्षराणि जातानि। एतासु सन्धिषु भारत-ऋतु-विज्ञान-विभागस्य सेशेल्स-ऋतु-विज्ञान-प्राधिकरणस्य च मध्ये वैज्ञानिकं तान्त्रिकं च सहयोगम् अन्तर्भवति। अस्मिन् अवसरे श्रीमोदी अवदत् यत् भारत-सेशेल्स-देशौ न केवलं भौगोलिक दृष्ट्या अपितु इतिहासेन, विश्वासेन, भविष्यस्य सहभागितायाः दृष्ट्या च सम्बद्धौ स्तः।

## अमितशाहः नक्सलजनान् समाजस्य मुख्यधारायां आगन्तुं प्रार्थयत्



**हिमसंस्कृतवार्ताः** - केन्द्रीय-गृह-मन्त्री अमितशाहः, अवशिष्टान् सक्रियान् नक्सल-जनान्, शस्त्राणि समर्पयित्वा, आत्मसमर्पणं कृत्वा, समाजस्य मुख्यधारायां आगन्तुं प्रार्थयत्। सः अवदत् यत् सर्वकारः पूर्णमर्यादया तेषां पुनर्वसनं सुनिश्चितं करिष्यति। अद्य छत्तीसगढस्य बस्तरस्य विभागीय-मुख्यालये जगदलपुरे बस्तरपण्डुम-महोत्सवस्य समापनसमारोहं सम्बोधयन् केन्द्रीय-गृहमन्त्रीळी उक्तवान् यत् ये नक्सलवादिनः सशस्त्र सङ्घर्षं निरन्तरं कुर्वन्तः सन्ति ते न त्याज्याः भविष्यन्ति, शस्त्राणां उत्तरं शस्त्रेण एव प्रदीयते। सः अवदत् यत् सर्वकारस्य सङ्घर्षः आदिवासि-समुदायानां सुरक्षायै अस्ति।

## लोकसभायाः कार्याचरणं काङ्ग्रेस-दलेन बाधितम् - किरेन रिजिजुः

**हिमसंस्कृतवार्ताः** - केन्द्रीय-संसदीय कार्यमन्त्री किरेन रिजिजुः आरोपितवान् यत् लोकसभायाः कार्याचरणं काङ्ग्रेस-दलेन बाधितम्। नवदेहल्यां प्रसारमाध्यमैः सह वार्तालापं कुर्वन् श्रीरिजिजुः अवदत् यत् काङ्ग्रेस-सदस्यानां अशोभनीय-व्यवहारकारणेन राष्ट्रपतेः अभिभाषणस्य धन्यवाद-प्रस्तावस्य विषये चर्चा नाभवत्, लोकसभाध्यक्षः ओमबिरला अपि विपक्षस्य आचरणस्य विषये चिन्तां प्रकटितवान्।



## सुभाषितम्

**उपदेशो हि मूर्खाणां, प्रकोपाय न शान्तये।**
**पयः पानं भुजंगानां, केवलं विषवर्धनम्।।**

भावार्थः- उपदेश उसे ही देना चाहिए जो उसका पात्र हो, अभिलाषी हो और ग्रहण करने को तत्पर हो। मूर्ख को उपदेश देने से वह वैसे ही विपरीत अर्थ लगाता है, जैसे सर्प को दूध पिलाने से वह विष ही उगलता है।

दैनिकं ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य समुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## लीबियायाः तटसमीपं नौकायाः जलमग्नेन द्वौ बालकौ समेत्य त्रिपञ्चाशत्-प्रवासिनः मारिताः



**हिमसंस्कृतवार्ताः** - इंटरनेशनल-ऑर्गनाइजेशन फॉर-माइग्रेशन इत्यनया संस्थया प्रोदीरितं यत् लीबियायाः तटसमीपं नौकायाः जलमग्नेन जाते दुरापन्ने पञ्चपञ्चाशत् संख्याकेषु नौकायात्रिषु द्वौ बालकौ समेत्य त्रिपञ्चाशत्-प्रवासिनः मारिताः सन्ति इत्याशङ्का वर्तते। IOM इत्यनेन प्रोक्तं यत् नौका एषा जुवारा-नगरस्य उत्तरक्षेत्रे जलमग्ना जाता अपि च लीबियाधिकारिभिः प्रचालिते सहायोद्धारकार्ये केवलं नाइजीरियामूलस्य द्वे महिले एव सुरक्षिते।

# हिमाचलस्य बृहत्तमे चिकित्सालये उपचारः महार्घः, विशिष्टकक्षाणां (Special Ward) शुल्कं वर्धितम्; 'पैट स्कैन' तः 'एमआरआई' पर्यन्तं शुल्कानि निश्चितानि



**हिमसंस्कृतवार्ताः - शिमला।**
हिमाचलप्रदेशस्य बृहत्तमे चिकित्सालये 'आईजीएमसी शिमला' इत्यत्र उपचारः अधुना महार्घः जातः। रोगिभ्यः अधुना उपचाराय अधिकं धनं व्ययितव्यं भविष्यति। चिकित्सालयस्य विशिष्टकक्षे (Special Ward) प्रवेशः अपि व्ययसाध्यः जातः। एतेन सहैव 'एमआरआई' (MRI) तथा 'पैट स्कैन' (PET Scan) इत्यनयोः परीक्षणयोः नूतनदरेभ्यः अपि अनुमतिः दत्ता। अयं निर्णयः चिकित्सालये 'रोगी कल्याण समिति' (RKS) इत्यस्याः उपवेशने स्वीकृतः।

## १५०० रूप्यकाणां स्थाने २००० रूप्यकाणि दातव्यानि भविष्यन्ति

सोमवारवासरस्य 'रोगी कल्याण समिति' इत्यस्याः उपवेशने विशिष्टकक्षाणां शुल्कं 'चमियाणा' चिकित्सालयस्य समानम् कृतम्। अधुना विशिष्टकक्षे प्रवेशार्थं रोगिभ्यः एकरोगिणे (Single) निर्मितस्य कक्षस्य २००० रूप्यकाणि प्रतिदिनं शुल्कं दातव्यं भविष्यति, तत्रैव सहभागितायां (Sharing) एतत् शुल्कं १००० रूप्यकाणि भविष्यति।

## अतिरिक्त-एक्स-रे तथा अल्ट्रासाउण्ड इत्यस्य शुल्कनिश्चयः

अतिरिक्त-एक्स-रे (X-Ray) निमित्तं ५० रूप्यकाणि तथा अल्ट्रासाउण्ड (Ultrasound) निमित्तं १३० रूप्यकाणि शुल्कं स्वीकरिष्यते। उपवेशने परीक्षणसेवानां दरेभ्यः अपि अनुमतिः दत्ता।

## उदरस्कैन तथा एमआरआई शुल्कम्

पैट स्कैन (PET Scan) निमित्तं १०,००० रूप्यकाणां शुल्कं निश्चितम् अस्ति। चिकित्सालयप्रशासनस्य कथनमस्ति यत् एतद् शुल्कं चण्डीगढ़-पीजाई-संस्थानस्य अपेक्षया न्यूनं भविष्यति। एमआरआई-परीक्षणाय ३००० रूप्यकाणि शुल्कं निर्धारितम्। चिकित्सालयप्रशासनेन पूर्वं एमआरआई-निमित्तं २७०० तः ४००० रूप्यकाणां शुल्कं प्रस्तावितम् आसीत्, किन्तु चर्चोत्तरं एतत् ३००० रूप्यकेषु निश्चितं जातम्।

## विक्रेतृभ्यः (Shopkeepers) ५ प्रतिशतं 'टर्नओवर' स्वीकरिष्यते

आईजीएमसी-परिसरे प्रचलन्तीभ्यः सर्वेभ्यः आपणेभ्यः तासां वार्षिक-'टर्नओवर' इत्यस्य ५ प्रतिशतं शुल्कं स्वीकरिष्यते। चिकित्सालयप्रशासनस्य मतमस्ति यत् अस्याः व्यवस्थायाः 'आरकेएस' इत्यस्याः आये वृद्धिः भविष्यति।

## आरकेएस-कर्मचारिभ्यः नियमितवेतनमानम्

'आरकेएस' अन्तर्गतं कार्यरतेभ्यः कर्मचारिभ्यः नियमितवेतनमानं प्रदातुं निर्णयः अपि स्वीकृतः। दीर्घकालात् कर्मचारिणः इमां याचनां कुर्वन्तः आसन्, या अधुना अङ्गीकृता। चिकित्सालये केचन आरकेएस-कर्मचारिणः पूर्वमेव नियमितवेतनमानं प्राप्तवन्तः आसन्, किन्तु ५५ प्रायः अवशिष्टाः आसन्। उपवेशने एतेभ्यः अपि अयं लाभः प्रदातुं निर्णयः कृतः। पूर्वतः नियमितानां कर्मचारिणां कृते षष्ठं संशोधितवेतनमानं (6th Revised Pay Scale) प्रदातुं विषये अद्यापि कोऽपि अन्तिमनिर्णयः न जातः। अस्मिन् विषये आगामिनि उपवेशने पुनः चर्चा भविष्यति इति उक्तम्। उपवेशने अध्यक्षता स्वास्थ्यमन्त्री धनी राम शाण्डिल महोदयेन कृता। एतदतिरिक्तं स्थानीयविधायकः हरीश जनार्था, महापौरः सुरेन्द्र चौहानः तथा अन्ये सदस्याः उपस्थिताः आसन्।

## चिकित्सालयप्रशासनम् किं वदति ?

चिकित्सालयप्रशासनस्य मतमस्ति यत् नूतनदरैः आधुनिकयन्त्राणां निर्वहणं (Maintenance), औषधानि तथा अन्याः आवश्यकीः सुविधाः श्रेष्ठाः कर्तुं शक्यन्ते।यद्यपि, सामान्यरोगिणां सहायकानां च कृते अयं निर्णयः महार्घतां वर्धयिष्यति इति सिद्धं भवितुं शक्नोति। नूतनानि शुल्कानि तत्कालप्रभावेन प्रभाविणि जातानि।

# HP Cabinet Meeting - १२ फरवरी दिनाङ्के भविष्यति हिमाचल-मन्त्रिमण्डलस्य गोष्ठी, आरडीजी-स्थगनेन स्वीकर्तुं शक्यन्ते कठोराः निर्णयाः

**हिमसंस्कृतवार्ताः - शिमला।**
हिमाचलप्रदेश-मन्त्रिमण्डलस्य आगामि-उपवेशनस्य तिथिः निश्चिता जाता। मुख्यमन्त्रिणः सुखविन्दरसिंहसुक्खू महोदयस्य अध्यक्षतायां १२ फरवरी दिनाङ्के राज्यसचिवालये मन्त्रिमण्डलस्य उपवेशनं आयोजितं भविष्यति। प्रातः ११:०० वादने प्रदेशसचिवालयस्य 'शिखर-सम्मेलन-सभागारे' आरभ्यमाणे अस्मिन् उपवेशने केचन बृहत्-निर्णयाः स्वीकर्तुं शक्यन्ते। उपवेशने प्रदेशस्य वित्तीय-स्थितिं सुदृढां कर्तुं तथा च आयस्य साधनानि वर्धयितुं चर्चा भविष्यति। वित्तविभागेन मन्त्रिमण्डले अयं प्रस्तावः उपस्थाप्यते। आरडीजी (राजस्व-हानि-अनुदानम्) स्थगनस्य-पश्चात् हिमाचलप्रदेशस्य आर्थिक-स्थितिः अधिका चिन्ताजनका जाता अस्ति।

## राज्यस्य आय-व्यय-पत्रे (बजट) १३ प्रतिशतं योगदानं आरडीजी-इत्यस्य भवति

राज्यसर्वकारः कर्मचारिभ्यः निवृत्तिवेतनधारकेभ्यः च नूतन-वेतनमानस्य अवशिष्टांशं ('एरियर') प्रदातुं स्थितौ नास्ति। महार्घता-वृत्तिः (DA) स्थगयितुं तथा सर्वाः अर्थसाहाय्य-योजनाः (Subsidies) स्थगयितुं स्थितिः उत्पन्ना अस्ति। वित्त-प्रधानसचिवस्य देवेश कुमारस्य प्रस्तुत्याम् एषा वार्ता उक्ता। राज्यस्य आय-व्यय-पत्रे आरडीजी-इत्यस्य योगदानं १३ प्रतिशतं वर्तते। राज्यस्य ४८,००० कोटिरूप्यकाणां 'प्रतिबद्ध-व्ययः' (Committed Expenditure) अस्ति, यः अनिवार्यतया करणीयः एव।

## मन्त्रिमण्डले कठोराः निर्णयाः स्वीकरिष्यन्ते

राज्यस्य स्वकीयम् आयम् प्रायः १८ सहस्रकोटिरूप्यकाणि अस्ति। केन्द्रीय-कराणाम् अंशरूपेण केवलं १४ सहस्रकोटिरूप्यकाणि एव प्राप्स्यन्ते। ऋणरूपेण केवलं १० सहस्रकोटिरूप्यकाणि ग्रहीतुं शक्यन्ते। अर्थात् कुलम् ४२ सहस्रकोटिरूप्यकाणाम् एव प्रबन्धः भविष्यति। एतेषु सर्वेषु विषयेषु चर्चा करणीया अस्ति। अस्मिन् सन्दर्भे मन्त्रिणां अधिकारिणां च परामर्शाः अपि स्वीकरिष्यन्ते। सूच्यते यत् मन्त्रिमण्डले केचन कठोराः निर्णयाः स्वीकरिष्यन्ते।

# मालवप्रदेशस्य वैष्णोदेवीरूपा भादवामातुः पावनपरिसरे कर्तृत्वसंस्कृतसंवादगोष्ठी जाता

**हिमसंस्कृतवार्ताः- भादवामाता (मालवप्रदेशः)** मालवप्रदेशस्य वैष्णोदेवीरूपा भादवामातुः पावनपरिसरे श्रीराजराजेश्वरी- वेदविद्याप्रतिष्ठान- गुरुकुलम् इत्यस्य आयोजनत्वेन पञ्चपरिवर्तनबिन्दूनां कुटुम्बप्रबोधनं स्वदेशीभावना, सामाजिकसमरसता, पर्यावरणसंरक्षणं, नागरिककर्तव्यबोधः, संविधानपालनं च एतेषां आधारभूतेषु तत्त्वेषु कर्तृत्वसंस्कृतसंवादगोष्ठी सफलतया आयोजिता। गोष्ठ्याः मुख्यातिथिः जिलाशिक्षाधिकारी सुजानमलमहाभागः आसन्। तेन पञ्चपरिवर्तनं सामाजिक- राष्ट्रीयोत्थानस्य मूलाधारः इति प्रतिपादितम्। मुख्यवक्तृरूपेण मध्यप्रदेश- शिक्षकसंघस्य प्रान्तीय- संगठनमन्त्री, पूर्व-संस्कृतप्रकोष्ठ-प्रभारी हिम्मतसिंहजैनमहाभागः संस्कृतभाषां कर्तव्यबोधस्य तथा जीवनसंस्काराणां वाहिनी इति विवेचितवान्।विशिष्टातिथयः जिलासंरक्षकः मन्नालालमहाभागः, जिलाध्यक्षः सुनीलकुमारशर्मामहाभागः, जिलासचिवः कमलेशमहाभागः च आसन्।कार्यक्रमस्य संयोजकः संस्कृतभारत्याः जिलामन्त्री दिग्विजयपालिवालमहाभागः आसन्। गुरुकुलस्य गौरवपूर्णं परिचयं प्राचार्यः विकास- ओमप्रकाशशर्मामहाभागः अददात्। कार्यक्रमस्य अन्ते गुरुकुलस्य आचार्येण आभारप्रदर्शनम् कृतम्। अवसरेऽस्मिन् गुरुकुलस्य बटुकैः वेदमन्त्राणां सामूहिकसस्वरपाठनं कृतं, येन सम्पूर्णं वातावरणं संस्कृतमयं मन्त्रसम्मोहितं च अभवत्। आयोजनमिदं संस्कृतभाषायाः, कर्तृत्वभावनायाः, पञ्चपरिवर्तनमूल्यानां प्रेरणादायकः समन्वयः आसीत्।



# टांडा-चिकित्सा-महाविद्यालयस्य 'टैमकोट' शिक्षकसङ्घेन

## अनुचितवेतनविषये असन्तोषः प्रकटितः, तत्कालसमीक्षायाः अभ्यर्थना च कृता




**हिमसंस्कृतवार्ताः - काङ्ग्ड़ा।** डॉ. राजेन्द्रप्रसाद-राजकीय-आयुर्विज्ञान-चिकित्सा-महाविद्यालयस्य (टांडा) शिक्षकसङ्घेन 'टैमकोट' इत्यनेन हिमाचलप्रदेशे नवनियुक्तानां चिकित्साधिकारिणां/प्राध्यापकानां (Faculty) कृते दीयमानायाः अतीव अन्यायपूर्णायाः मनोबलभञ्जिकायाः च वेतनसंरचनायाः कृते सर्वकारस्य, नीतिनिर्धारकाणां जनतायाः च ध्यानम् आकृष्टं कुर्वता सह तीव्रः असन्तोषः व्यक्तः। अयं सन्दर्भः न्यूरोसर्जरी-विषये 'एमसीएच' (MCh) सुपर-स्पेशलाइजेशन-पाठ्यक्रमं पूर्णं कृत्वा 'एमआईएसएस' (MISS) चामियानायाः न्यूरोसर्जरी-विभागे 'जॉब ट्रेनी' (Job Trainee) रूपेण सद्यः नियुक्तस्य एकस्य चिकित्साधिकारिणः विषये अस्ति। नियुक्तेः वर्तमाननियमाः गम्भीराः प्रशासकीय-नैतिक-दीर्घकालिक-जनस्वास्थ्य-सम्बद्धाः चिन्ताः जनयन्ति।

### शिक्कसङ्घस्य 'टैमकोट' इत्यस्य मुख्याक्षेपाः

पूर्णप्रशिक्षणानन्तरमपि "प्रशिक्षु-चिकित्साधिकारी" इति पदनामः अनिवार्ययोग्यतां पञ्जीकरणं च पूर्णं कृत्वापि नवनियुक्ताः चिकित्सकाः 'प्रशिक्षु' (Trainee) रूपेण नामिताः क्रियन्ते। एतत् पदनाम भ्रामकं, वृत्तिगतदृष्ट्या अनुचितं तथा च स्वतन्त्ररूपेण रोगिणां आपत्कालीनस्थितीनां च प्रबन्धनं कुर्वतां योग्यानां चिकित्सकानां क्षमतां उत्तरदायित्वं च दुर्बलीकरोति। अस्मिन् प्रकरणे, उक्तचिकित्सकेन पूर्वमेव सार्धपञ्चवर्षाणां 'एमबीबीएस' (MBBS), त्रिवर्षाणां शल्यक्रियायां 'एमएस' (MS) तथा त्रिवर्षाणां न्यूरोसर्जरी-विषये 'एमसीएच' (MCh) इति द्वादशवर्षाणां अतीव कठिनं प्रशिक्षणं पूर्णं कृतम्। तथापि तं 'प्रशिक्षु' इति वक्तुं हास्यस्पदं वर्तते।

### नियमित-राजकीय-सेवायाम् "अनुबद्ध-अभ्यर्थी" (Bonded Candidate) इति शब्दस्य प्रयोगः

यैः चिकित्सकैः स्वशैक्षणिक-प्रशिक्षण-सम्बद्धाः सर्वाः बाध्यताः पूर्णाः कृताः, तेषां कृते 'अनुबद्ध-अभ्यर्थी' (Bonded Candidate) इति शब्दस्य प्रयोगः विधिक-प्रशासकीय-दृष्ट्या सन्दिग्धः अस्ति। एतादृशी शब्दावली सेवायाः स्थाने प्रभावं सूचयति तथा च नियमित-राजकीय-नियुक्तिषु निष्पक्ष-रोजगार-सिद्धान्तानां विपरीता अस्ति। अपि च, इयं नियुक्तिः एकवर्षीय-अस्थायि-व्यवस्थारूपेण दर्शिता, यस्य अर्थः अस्ति यत् सर्वकारः न इच्छति यत् सः एकवर्षानन्तरमपि राज्यस्य जनतायाः सेवां कुर्यात्।

### प्रशिक्षण-अवधौ प्राप्तं वेतनं 'स्टाइपेण्ड' (Stipend) इत्यस्मादपि न्यूनम्

एतत् चिन्ताजनकं वर्तते यत् नियुक्त्यनन्तरं दीयमानं वेतनं 'एमसीएच' (Super-specialization) प्रशिक्षणकाले लभ्यमानात् 'स्टाइपेण्ड' (वजीफा) इत्यस्मादपि न्यूनम् अस्ति। सम्बन्धित-चिकित्साधिकारिणे प्रतिमासं ३३,६५० रूप्यकाणां प्रस्तावः दत्तः, यदा तु 'रेजीडेंसी' (Residency) काले सः प्रतिमासं १ लक्ष ३० सहस्ररूप्यकाणि प्राप्नोति स्म। इयं विसंगतिः तर्कहीना, सेवाप्रगति-सिद्धान्तानां उल्लङ्घिका तथा च सार्वजनिकसेवायाम् आगच्छतां युवचिकित्सकानां मनोबलं भञ्जयितुं एकः सन्देशः अस्ति।

### ६ तः १२ वर्षाणां कठोर-चिकित्सा-प्रशिक्षणानन्तरं विसंगतिपूर्णं न्यूनवेतनम्

एकः चिकित्सकः सामान्यतया स्नातक-शिक्षां, इन्टर्नशिप-पाठ्यक्रमं तथा अन्याः स्नातकोत्तर-योग्यताः च मिलित्वा १०-१२ वर्षाणि अतीव कठिने प्रशिक्षणे व्यतीतं करोति। एतावतः दीर्घप्रशिक्षणानन्तरं एतादृशं न्यूनवेतनं राजकीयचिकित्सालयेषु चिकित्साकर्तव्यानां उत्तरदायित्वं, कार्यभारं, चिकित्सा-विधि-संकटं (Medico-legal risk) तथा अहोरात्रं व्यस्ततां च उचितं न प्रतिपादयति। १२ वर्षाणां प्रशिक्षणानन्तरं प्रतिमासं मात्रं ३३,६५० रूप्यकाणां वेतनं उपहासः एव। निगमितक्षेत्रे (Corporate Sector) सः एव विशेषज्ञचिकित्सकः सुलभतया प्रतिमासं ५ लक्षरूप्यकाणि अर्जयितुं शक्नोति स्म।

# विपक्षस्य कोलाहलकारणात्

## लोकसभायाः कार्यम् एकदिवसाय स्थगितम्

**हिमसंस्कृतवार्ताः** - विपक्षस्य कोलाहलकारणात् लोकसभायाः कार्यम् एकदिवसाय स्थगितम्। द्वितीय-स्थगनस्य अनन्तरं यदा सभा पुनः समागता तदा पीठासीन अधिकारी षड्विंशत्यधिक द्विसहस्र-सप्तविंशत्यधिक द्विसहस्रतम वर्षयोः केन्द्रीय-आयव्यय-सङ्कल्पनापत्रस्य विषये चर्चा कर्तुं प्रायतत, तथा काङ्ग्रेस्-सदस्यं शशिथरूरवर्यं वक्तुं आह्वयत्। परञ्च, श्रीथरूरः विपक्षस्य नेता राहुलगान्धिनः कृते चर्चायाः प्राक् अन्यविषयेषु वक्तुं अनुमतिं दातुं अध्यक्षं प्रार्थयत्। पीठासीन अधिकारिणा सन्ध्या रे इत्यनया उक्तं यत्, तया विपक्षनेतृभ्यः किमपि सूचना न प्राप्ता अस्ति, यदि सा आयव्ययकस्य विषये वक्तुं इच्छति तर्हि सः वक्तुं शक्नोति । अध्यक्षेन काङ्ग्रेस्-सदस्येभ्यः चर्चायाः अनुमतिं दातुं प्रार्थितम्। अध्यक्षस्य पुनः पुनः प्रार्थनायाः अनन्तरं अपि केन्द्रीय-आयव्ययक पत्रस्य विषये चर्चा नाभवत्। कोलाहलस्य मध्ये, पीठासीन अधिकारिणा सदनं स्थगितम्। ततः पूर्वं, दिने लोकसभायां अध्यक्षेण ओम बिरला-वर्येण भारतीय-अण्डर्-19 क्रिकेट्-दलं षड्विंशत्यधिक द्विसहस्रतम वर्षस्य अण्डर-19 विश्वकप स्पर्धा विजयाय वर्धापितम्। राज्यसभायाम् अस्य वर्षस्य केन्द्रीय-आयव्यय-संकल्पना-पत्रे चर्चा समारब्धा। काङ्ग्रेस-दलस्य सांसदेन पी. चिदम्बरम् इत्यनेन चर्चा समारब्धा आरम्भः कृतः।

# पर्यटनविकासपरियोजनासु २३५० कोटिरूप्यकाणां व्ययः क्रियते - मुख्यमन्त्री सुक्खुः




**हिमसंस्कृतवार्ताः - शिमला।** मुख्यमन्त्री सुखविन्दरसिंहसुक्खू महोदयः प्रदेशे एशियन विकास बैंक (ADB) इत्यस्य साहाय्येन विकसितानां विविधानां पर्यटनविकासपरियोजनानां समीक्षां कृतवान्। सः अवदत् यत् राज्ये एडीबी-सहयोगेन प्रथमचरणे १६२० कोटिरूप्यकाणां तथा द्वितीयचरणे ७३० कोटिरूप्यकाणां परियोजनाः कार्यान्विताः सन्ति।

**परियोजनानां मुख्याः अंशाः**

विश्वस्तरीय-गुणवत्ताः मुख्यमन्त्रिणा निर्दिष्टं यत् निर्माणकार्ये विश्वस्तरीया गुणवत्ता भवेत् तथा च सर्वाः परियोजनाः निश्चितसमये पूर्णाः भवेयुः। सर्वकारः हिमाचलपर्यटनं 'ब्रान्ड' (Brand) रूपेण स्थापयितुं कार्यं करोति। अनेन राज्यस्य अर्थव्यवस्था सुदृढा भविष्यति तथा च रोजगारस्य स्वरोजगारस्य च नूतनावसराः प्राप्स्यन्ते।

पर्यटकानां सौकर्याय हेलीपोर्ट्-निर्माणं प्रचलति तथा च काङ्ग्ड़ा-विमानपत्तनस्य विस्तारीकरणं क्रियते।

**मण्डलानुसारं विकासकार्याणिः**

काङ्ग्ड़ा जनपदं पर्यटन-राजधानी कर्तुमुद्दिश्य पालमपुर-नगरोटा बगवां क्षेत्रयोः विकासः क्रियते।

पालमपुरे ७७.७० कोटिरुप्यकैः बहुस्तरीय-वाहनस्थानकं (Multi-level Parking), कॉफी-शॉप्, पुस्तकालयः, न्यूगल-कैफे-जीर्णोद्धारः च भविष्यति। नगरोटाबगवां इत्यत्र मार्गविकासः, क्लॉक-टावर-निर्माणं, गान्धी-ग्राउण्ड्, मटौर-गार्डन तथा मन्दिराणां सौन्दर्यीकरणम् च भविष्यति। हमीरपुरे बाबाबालकनाथमदिरे ५१.०९ कोटिरुप्यकैः मन्दिरपरिसरस्य सौन्दर्यीकरणं तथा आधारभूत-संरचनायाः विस्तारः भविष्यति। धर्मशालायां ३३.७८ कोटिरुप्यकैः आइस-स्केटिङ्ग-रिङ्क (Ice Skating Rink) तथा रोलर-स्केटिङ्ग-रिङ्क निर्मास्यते।

कुल्लू -मनाली इत्यत्र ५६.७६ कोटिरुप्यकैः वेलनेस्-सेण्टर् (Wellness Centers) तथा नग्गर-दुर्गस्य (Naggar Castle) संरक्षणम् प्रस्तावितम्।

**अग्रिम-योजनाः**

१. शिमला-मनाली क्षेत्रयोः नूतनानि आइस-स्केटिङ्ग-रिङ्क स्थानानि।

२. नादौन-क्षेत्रे (हमीरपुर) राफ्टिङ्ग-कॉम्प्लेक्स् (Rafting Complex) तथा साहसिक-क्रीडा-केन्द्रस्य निर्माणम्।

३. कालेश्वर-महादेव-मन्दिरे जनसुविधानां विस्तारः।

मुख्यमन्त्रिणा बलं दत्तं यत् एताभिः योजनाभिः हिमाचलप्रदेशः विश्वपर्यटनमानचित्रे एकं विशिष्टं स्थानं प्राप्स्यति।

# हिमाचलप्रदेशे ड्रोनस्य साहाय्येन क्षेत्रेषु शस्यानां रोगपरिचयः;त्रिगुणः-आइ-आइ-टी ऊनायां प्रशिक्षु अभियन्तृभिः नवीनप्रौद्योगिकी विकसिता



**हिमसंस्कृतवार्ताः ऊना ।**अधुना ड्रोनस्य माध्यमेन क्षेत्रेषु शस्यानां रोगाणां कीटानां च परिचयः कर्तुं शक्यते। त्रिगुणः-आइ-आइ-टी ऊनायाः (भारतीयसूचनाप्रौद्योगिकीसंस्थानम्, ऊना) प्रशिक्षु अभियन्तृभिः एषा नवीनप्रौद्योगिकी विकसितास्ति। एतस्याः साहाय्येन रोगमुक्ता फसलोत्पत्तिः सुलभा भविष्यति। न केवलं रोगपरिचयः, अपि तु ड्रोनस्य माध्यमेन औषधिसिञ्चनमपि कर्तुं शक्यते। अस्याः प्रौद्योगिक्याः प्रमुखः लाभः—कृषकाणां श्रमव्ययः व्ययच्च न्यूनता, तथा स्मार्ट-कृषेः प्रभावी समाधानम्।
त्रिगुणः-आइ-आइ-टी ऊनायाः प्रशिक्षु अभियन्तृणां कथनानुसारम्, त्रयः चत्वारो वा मासाः अन्तरे एषा प्रौद्योगिकी बाजारं नीयते, या न्यूनलागतया कृषकेभ्यः उपलब्धा भविष्यति। त्रिपल्-आइ-आइ-टी ऊनायाः तकनीकीमहोत्सवे 'मेराकी-२०२६' इत्यत्र अस्याः प्रौद्योगिक्याः विषये महान् उत्साहः दृश्यते। प्रशिक्षु अभियन्तारः, बाह्यनिजी-सर्वकारीविद्यालयेभ्यः आगताः छात्राश्च, जिज्ञासया सहितं सूचनासङ्ग्रहे प्रवृत्ताः सन्ति।संस्थानस्य निदेशकः प्रोफेसर् मनीष् गौरः अवदत्—नवाचारयुगे प्रशिक्षु अभियन्तारः नित्यं नूतनानां प्रौद्योगिकीनाम् आश्रयं कुर्वन्ति, एषा प्रौद्योगिकी अपि तस्याः दिशायाः नूतना पहल अस्ति। अस्याः प्रत्यक्षः लाभः कृषकाणां भविष्यति। एतया श्रमः न्यूनो भविष्यति, कालः अपि रक्ष्यते। कृषकाः अस्याः साहाय्येन कृषि-व्यवसायं सुलभतया कर्तुं शक्नुवन्ति, येन फसलस्य गुणवत्ता वर्धते तथा उचितमूल्यलाभोऽपि सुनिश्चितो भविष्यति।पीएच्.डी. छात्रा धर्मशालानिवासिनी महक् इति अवदत्—अनेन ड्रोनद्वारा फसलां बाधमानानां कीटानां रोगाणां च परिचयः कर्तुं शक्यते, पशुभ्यः अपि संरक्षणं लभ्यते। अस्मिन् ड्रोनमध्ये कृत्रिमबुद्धि-प्रौद्योगिकीयुक्तः क्यामेरा स्थापितः अस्ति, यस्य चित्रविश्लेषणेन फसलानां अवस्थायाः विशदं मूल्याङ्कनं क्रियते।त्रिगुणः-आइ-आइ-टी ऊनायाः तृतीयवर्षीयः बी-टेक् प्रशिक्षु अभियन्ता, उत्तरप्रदेश-निवासी दीपु विश्वनाथः अवदत्—एषा प्रौद्योगिकी अल्पकालेन अल्पश्रमेन कृषकसमस्यानां समाधानं कर्तुं समर्था भविष्यति।प्रोफेसर् मृत्युंजयः अपि अवदत्—द्वि-त्रि-मासाभ्यां मध्ये एषा प्रौद्योगिकी विकसितास्ति, तथा अल्पात् अल्पतमकृषकपर्यन्तं तां प्रापयितुं प्रयत्नाः क्रियन्ते। न्यूनलागतया एषा निर्मीयते तथा शैक्षिकदृष्ट्या विन्यस्तास्ति। त्रि-चतुर्मासानन्तरं एषा बाजारं नीयते तथा ड्रोन-निर्मातृ-कम्पन्यै सुपुर्दा करिष्यते। अस्यां सम्बन्धिता एका मोबाइल-अनुप्रयोगा (एप्लिकेशन) अपि निर्मीयते, या प्रत्यक्षतया कृषकाणां क्षेत्रसम्बद्धां सूचनां तेषां दूरभाषे प्रेषयिष्यति।

# कुमारभास्करवर्मसंस्कृतविश्वविद्यालयस्य संस्कृतसाहित्यविभागपक्षतः लुइत-अकादेमीकनिष्ठमहाविद्यालये संस्कृतसम्पसारणकार्यक्रमः आरम्भजातः




**हिमसंस्कृतवार्ता डॉ. निशिकान्तपाण्डेयः धमधमा, असममप्रदेशः।** कुमारभास्करवर्मसंस्कृत-विश्वविद्यालयस्य संस्कृतसाहित्यविभागपक्षतः लुइत-अकादेमीकनिष्ठमहाविद्यालये संस्कृतसम्पसारण-कार्यक्रमस्य शुभारम्भजातम् ०५ तमे दिनांके। धमधमास्थिते लुइत-अकादेमीकनिष्ठमहाविद्यालयस्य अध्यक्षः मनोरञ्जनभागवतीवर्यः । सः अत्र उपस्थिताः अतिथीनां परिचयं कारितवान् तेभ्यः सम्मानं च कृतवान् । तत्परं द्वीपप्रज्वलेन अनुष्ठानस्य आरम्भः कृतः। कार्यक्रमेऽस्मिन् कुमारभास्करवर्म-संस्कृतविश्वविद्यालयस्य साहित्यविभागस्य प्राचार्यः डॉ.रातुलबुजरबरुवा तथा डॉ.निवेदितागोस्वामी च संस्कृतशिक्षा वर्धनाय-सम्प्रसारणाय-प्रसाराय-प्रचाराय च बहु मूल्यवानभाषणं प्रदत्तम् । अस्मिन् कार्यक्रमे विशेषरूपेण साहित्यविभागस्य विभागाध्यक्षः उक्तवान् संस्कृतं सर्वया भाषया जन्मदात्री माता। संस्कृते सर्वम् अस्ति यथा गणितम्, विज्ञानम्, कला च । इदं विषयं बहु रुचिकरमानन्ददायकं च । तदनन्तरं साहित्याध्यापिका डॉ . निवेदिता गोस्वामी अपि छात्राणां बोधाय संस्कृतस्य माहात्म्यविषये वोधीतवती । तदनु छात्राः स्वीयप्रतिभा प्रदर्शितवन्तः । अन्ते अनुष्ठानस्य समापनं जातं शान्तिमन्त्रेन ।

# म.म.यो. वैदिकविश्वविद्यालयेन "व्याकरणशास्त्रेण वेदस्य सुरक्षा" इति विषयकं व्याख्यानसत्रम् आयोजितम्



शनिवासरे माननीयकुलगुरोः संरक्षणे महर्षि-महेश-योगी-वैदिकविश्वविद्यालयस्य महर्षि-वेद-विज्ञान-विद्यापीठस्य च संयुक्ततत्त्वावधाने विद्यापीठप्राङ्गणे "व्याकरणशास्त्रेण वेदस्य सुरक्षा" इति विषये गम्भीरं ज्ञानवर्धकं च व्याख्यानसत्रम् आयोजितम्।अस्मिन् कार्यक्रमे उद्देश्यकथनं डॉ. आलोकचन्द्रपरिडा-महोदयेन प्रस्तुतम्। मुख्यवक्तारूपेण श्री-अमित-उपाध्याय-महोदयेन स्वकीयं विद्वत्तापूर्णं व्याख्यानम् प्रदत्तम्, अध्यक्षतां च श्री-नारायण-पौडेल-महोदयः कृतवान्।कार्यक्रमस्य शुभारम्भः वैदिकमङ्गलाचरणेन अभवत्। अनन्तरं उद्देश्यकथनं प्रस्तौता डॉ. आलोकचन्द्रपरिडामहोदयः वेदानां शाश्वततां तेषामक्षुण्णपरम्परायाः संरक्षणे वेदाङ्गानामनिवार्यभूमिकां विशदतया निरूपितवान्। विशेषतया व्याकरणं वेदरक्षायाः प्रमुखं साधनमिति प्रतिपादयन् उक्तवान् यत् शब्द-धातु-प्रत्यय-सन्धि-संरचनानां शुद्धतां विना वेदपाठस्य मौलिकता संरक्षितुं न शक्यते।मुख्यवक्ता श्री-अमित-उपाध्याय-महोदयः स्वोद्बोधने वेदसम्बन्धित-पादानि आदाय पाणिनीयव्याकरणस्य वैज्ञानिकतां संरचनात्मकक्षमतां च उल्लिख्य स्पष्टतया निरूपितवान् यत् व्याकरणशास्त्रं वेदस्य पदानां शुद्धतां, अर्थस्य स्पष्टतां, उच्चारणस्य शुचितां च सुनिश्चितं करोति। उदाहरणैः सह तेन दर्शितं यत् व्याकरणाभावे शब्दभ्रंशस्य अर्थभ्रंशस्य च सम्भावना वर्धते, येन वेदस्य वास्तविकाभिप्रायः बाधितो भवेत्। सः वेदाङ्गेषु—शिक्षा, कल्प, निरुक्त, छन्दः, ज्योतिषं, व्याकरणम्—इत्यादिषु व्याकरणस्य केन्द्रीयभूमिकामपि प्रकाशितवान्।अध्यक्षीयोद्बोधने वेद विज्ञान विद्यापीठस्य प्राचार्यः श्री-नारायण-पौडेल-महोदयः एतादृशस्य व्याख्यानसत्रस्य प्रशंसां कृत्वा उक्तवान् यत् वेदपरम्परा केवलं स्मृत्याधारिता न, अपितु शास्त्रीयानुशासनाधारिता अस्ति। तस्य अनुशासनस्य बीजं व्याकरणमेव। तेन विद्यार्थिनः वेदाध्ययनेन सह व्याकरणस्य गम्भीराध्ययनाय प्रेरिताः।तदनन्तरं डॉ. नित्येश्वर-चतुर्वेदी-महोदयेन धन्यवादज्ञापनं कृतम्। श्रीधनीरामत्रिपाठीमहोदयेन श्रीबृजेशकुमारमिश्र-महोदयेन च शान्तिपाठेन कार्यक्रमस्य समापनं कृतम्। कार्यक्रमेस्मिन् विद्यापीठस्य सर्वे आचार्याः प्रायः शताधिकाः छात्राश्च उपस्थिताः आसन्। एतत् व्याख्यानसत्रं उपस्थितानां वैदिकबटुकानां श्रोतृणांच कृते अत्यन्तं प्रेरणादायकज्ञानसमृद्धं च सिद्धम्।

**हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः**

# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये। अमेरिका-देशस्य नूतन-हाम्पशर-राज्ये शुद्ध-जलाय जनैः दशवर्षं यावत् सङ्घर्षः कृतः। अन्ते सर्वकारः विवशः जातः।
**काव्या-** नमस्ते नन्दिनि। जलं तु जीवनम् अस्ति, अतः एषः विजयः तैः प्राप्तः इति महते सुखाय। अपरतः, चीन-देशस्य शौलिन्-मठे आश्चर्यकरं दृश्यं दृष्टम्। तत्र यन्त्रमानवैः (Robots) भिक्षुभिः सह युद्धकलायाः अभ्यासः कृतः।
**नन्दिनी-** सत्यम्, यन्त्रेषु अपि इदानीं कौशलं दृश्यते। किन्तु मनुष्यस्य श्रमः अपि चिन्तनीयः। एकेन भारतीय-स्नातकेन अमेरिका-देशे कार्यं प्राप्तुं बहु यत्नः कृतः, किन्तु प्रवेशाज्ञा-कारणात् (Visa) सः भारतं प्रतिगतवान् अस्ति।
**काव्या-** एतद् दुःखदं वर्तते, युवकाः कष्टेन लक्ष्यं प्राप्नुवन्ति। वेशभूषायाः विषये एका वार्ता अस्ति। एका अमेरिका-नारी भारतीय-'उत्तरीयस्य' (Dupatta) प्रशंसां कृतवती अस्ति। तया उक्तं यत् एतद् वसनं परिधानं सुन्दरं करोति।

# ।।श्रीरामाय नमः।। वाल्मीकिरामायणस्य बालकाण्डसमीक्षा






डॉ विमलेश झा, डीएवी पब्लिक स्कूल,बरारी, भागलपुर

जानन्ति एव भवन्तो यद् भारतीयसनातनधर्मस्य इतिहासे रामायणं तादृशं ग्रन्थरत्नं वर्तते यस्य अध्ययनं न केवलं हिन्दूधर्मावलम्बिनः कुर्वन्ति अपितु अस्यां भूमौ निवासिनः सर्वे जनाः कुर्वन्ति। रामायणग्रन्थाः तु बहवः सन्ति परञ्च तेषु सर्वेषु ग्रन्थेषु आदिकाव्यरूपेण महर्षिवाल्मीकिना विरचितं रामायणं सर्वश्रेष्ठं उत्तरोत्तरप्रामाणिकं च मन्यते।भारतीयसंस्कृतेः महाकाव्यपरम्परायां वाल्मीकिना विरचितं रामायणम् अद्वितीयं स्थानं धारयति। एतत् काव्यं न केवलं साहित्यिकदृष्ट्या महत्त्वपूर्णं, अपि तु धर्म- नीति- आदर्शजीवन-सामाजिकमूल्येषु च गम्भीरं मार्गदर्शनं प्रददाति। रामायणस्य सप्तकाण्डेषु प्रथमं काण्डं बालकाण्डः इति नाम्ना प्रसिद्धः वर्तते। अयं काण्डः सम्पूर्णरामकथायाः आधारशिलारूपेण अस्ति। अस्मिन् काण्डे भगवतः श्रीरामस्य अवतारकथा, तस्य बाल्यजीवनम्, गुरुशिष्यपरम्परा, समाजधर्मः, राजधर्मः, तपोबलस्य महत्त्वं च विस्तरेण प्रतिपादितम्। अतःअस्मिन् निबन्धे वयं वाल्मीकिरामायणस्य बालकाण्डस्य विषये चर्चां कुर्मः। 'बालकाण्डः' इति नाम तु श्रीरामस्य बाल्यकालं सूचयति, परन्तु अस्य विषयविस्तारः केवलं बाललीलासु न सीमितः वर्तते । अस्मिन् काण्डे ब्रह्माण्डोत्पत्तेः संक्षिप्तवर्णनं, देवासुरसङ्घर्षः, विष्णोः अवतारनिश्चयः, अयोध्यानगरस्य वैभववर्णनं, दशरथराज्ञः यज्ञकथा, श्रीरामादिचतुर्भ्रातॄणां जन्म, विश्वामित्रस्य आगमनं, रामलक्ष्मणयोः शिक्षादीक्षा, ताडकावधः, यज्ञरक्षणं, मिथिलायात्रा, सीतास्वयंवरं, रामसीतयोः विवाहः इत्यादयः विषयाः प्रतिपादिताः सन्ति। अयं काण्डः श्रीरामकथायाः विस्तृतां भूमिकां निर्माति। बालकाण्डस्य आरम्भे नारदमुनेः वाल्मीकिना सह संवादः भवति। अत्र उक्तमस्ति-

तपःस्वाध्यायनिरतं
तपस्वीवाग्विदां वरम्। नारदं परिपप्रच्छ
वाल्मीकिर्मुनिपुंगवम्॥पुनः च द्वितीये पद्ये वाल्मीकिः प्रश्नम् अपृच्छत्—'कोन्वस्मिन् साम्प्रतं लोके
गुणवान् कश्च वीर्यवान्। धर्मज्ञश्च कृतज्ञश्च
सत्यवाक्यो दृढव्रतः।।इति पद्यं सम्पूर्णरामकथायाः बीजस्वरूपं विद्यते। नारदःश्रीरामस्य चरित्रं संक्षेपेण वर्णयति। अयं प्रसङ्गः काव्यस्य संरचनात्मकदृष्ट्या महत्त्वपूर्णः, यतः अत्र कविः कथायाः आरम्भे एव नायकस्य आदर्शगुणान् उद्घोषयति। धर्मज्ञता, सत्यपराक्रमः, करुणा, क्षमा, त्यागः, पितृवाक्यपरिपालनमइत्यादयः श्रीरामस्य गुणाः अत्र प्रतिपादिताः सन्ति। बालकाण्डे वाल्मीकिनः तपोवनजीवनं, क्रौञ्चवधदृश्येन उत्पन्नः शोकः, तस्मात् जातः श्लोकः च अत्यन्तं काव्यमर्मस्पर्शी प्रसङ्गः अस्ति।

'मा निषाद प्रतिष्ठां त्वमगमश्शाश्वतीस्समाः ।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम् ।।' इति श्लोकः संस्कृतकाव्यपरम्परायाः आद्यश्लोको मन्यते। अयं प्रसङ्गः दर्शयति यत् करुणरसः काव्यस्य मूलं भवति। ब्रह्मणा प्रदत्तः काव्यलेखनादेशः वाल्मीकिं आदिकवित्वेन प्रतिष्ठापयति।बालकाण्डे अयोध्यानगरस्य समृद्धिवर्णनं, तस्य सामाजिकसांस्कृतिकव्यवस्था च विस्तरेण निरूपितम् अस्ति। अयोध्यानगर्याः धर्मप्रधानता , प्रजाहितैषिणं, समृद्धं नगरं इति चित्र्यते। राजा दशरथः आदर्शराजरूपेण चित्रितः यतो हि सः धर्मपरायणः, प्रजावत्सलः, वीरः, यशस्वी च आसीत्। तथापि पुत्रकामेष्टियज्ञकथायां दशरथस्य मानवीयदुर्बलता, पुत्रेच्छा, तस्य जीवनस्य केन्द्रीयबिन्दुः इति दृश्यते। देवैरभ्यर्थितः विष्णुः रावणवधार्थं मनुष्यरूपेण अवतरति इति कथा बालकाण्डस्य दार्शनिकाधारः वर्तते। श्रीरामःन केवलं ऐतिहासिकपुरुषः , अपि तु धर्मस्य साक्षात् मूर्तिरिति प्रतिपाद्यते। अवतारवादस्य माध्यमेन अधर्मनाशाय धर्मसंस्थापनस्य सिद्धान्तः अत्र प्रस्तुतः वर्तते। श्रीरामलक्ष्मणभरतशत्रुघ्नानां बाल्यजीवनं, गुरुकुलशिक्षा, वेदविद्या, धनुर्विद्या च वर्ण्यते। अत्र गुरुशिष्यपरम्परायाः महत्त्वं स्पष्टं भवति। श्रीरामस्य शीलं, सौम्यता, भ्रातृप्रेम, आज्ञापालनशीलता च आदर्शरूपेण निरूपिताः। राजर्षेः विश्वामित्रस्य अयोध्यागमनं, रामलक्ष्मणयोः यज्ञरक्षणार्थं विश्वामित्रेण सह गमनं बालकाण्डस्य महत्त्वपूर्णः अंशः वर्तते। अत्र क्षत्रियब्राह्मणयोः सम्बन्धः, तपोबलस्य सामर्थ्यं, राजधर्मस्य कर्तव्यं च प्रतिपादितम्। श्रीरामः अल्पवयस्कः अपि धर्मरक्षणे समर्थः इति दृश्यते। ताडकावधः सामाजिकसन्दर्भेण अपि विचारणीयः यत् अधर्मरूपिण्याः नाशः धर्मस्थापनार्थं आवश्यकः इति संदेशः अत्र निहितः अस्ति। विश्वामित्रः मुनिः श्रीरामाय दिव्यास्त्राणां प्रदानं कृतवान्। अयं प्रसङ्गः श्रीरामस्य दैवीशक्तिं सूचयति, तथापि श्रीरामः तान्यस्त्राणि स्वेच्छया न प्रयोगम् अकरोत्, केवलं धर्मः रक्षायै एव प्रयुक्तवान्। अयं संयमः श्रीरामस्य आदर्शत्वं अधिकृत्य दर्शयति। मिथिलायां राज्ञो जनकस्य राज्ये सीतास्वयंवरे शिवधनुषभङ्गः एतस्य काण्डस्य काव्यसौन्दर्यपूर्णः भागो वर्तते। अत्र सीता भूमिजा, त्यागशीलता, पतिव्रता, सौम्यता च आदर्शस्त्रीरूपेण दृश्यते। श्रीरामः शिवधनुषः भङ्गः न केवलं वीरताप्रदर्शनम्, अपि तु दैवीकृपायाः परिणामः इति काव्ये प्रतिपादितम् अस्ति। श्रीरामसीतयोः विवाहः भारतीयसंस्कृतेः आदर्शविवाहरूपेण प्रतिष्ठितः अस्ति। अत्र विवाहः केवलं सामाजिकसंस्कारः न, अपि तु धर्मसंयोगः इति प्रतिपादितः। अयोध्यामिथिलयोः सांस्कृतिकसमन्वयः अपि अत्र दृश्यते।बालकाण्डे सत्यं, धर्मः, त्यागः, गुरुश्रद्धा, पितृभक्तिः, भ्रातृप्रेम, स्त्रीसम्मानम् इत्यादीनि मूल्याणि निरन्तरं सर्वत्र प्राप्यन्ते। समाजस्य स्थायीनिर्माणाय नैतिकतायाः अनिवार्यता अत्र कविना सूक्ष्मतया प्रतिपादिता। बालकाण्डे मुख्यतः शान्तरसः, वीररसः, करुणरसः च प्रधानाः सन्ति। उपमा, रूपक, अनुप्रास, दीर्घवर्णनशैली च वाल्मीकिनः काव्यप्रतिभां दर्शयन्ति। भाषा सरला भूत्वा अपि गम्भीरा, छन्दः अनुष्टुप्प्रधानं विद्यते। बालकाण्डे कर्मसिद्धान्तः, अवतारवादः, पुरुषार्थचतुष्टयस्य (धर्मार्थकाममोक्ष) समन्वयः दार्शनिकरूपेण प्रतिपादितः। श्रीरामः धर्मस्य मानवरूपः इति भावना सर्वत्र प्रवहति। एवं च वाल्मीकिरामायणस्य बालकाण्डः केवलं श्रीरामस्य बाल्यजीवनविवरणमात्रम् एव न, अपि तु सम्पूर्णरामकथायाःदार्शनिकसांस्कृतिकभूमिकां रचयति। अस्य काण्डस्य अध्ययनात् पाठकाः धर्मनिष्ठां, आदर्शजीवनमार्गं, समाजोन्नतिं च अवगच्छन्ति। अतः बालकाण्डः भारतीयमहाकाव्यपरम्परायां अमूल्यरत्नरूपेण सदैव पूज्यः अस्ति। अन्ते च -

तया स राजर्षिसुतोऽभिकामया
समेयिवानुत्तमराजकन्यया।
अतीव रामः शुशुभे मुदान्वितो
विभुः श्रिया विष्णुरिवामरेश्वरः।।श्रीरामो विजयते।।इत्यलम्।।

## बिहारराज्यस्थडीएवीपब्लिक स्कूलबरारीभागलपुरविद्यालये द्वादशकक्षायाः छात्र-छात्राणां सत्रान्तसमारोहः सम्पन्नः




डी० ए० वी० पब्लिक स्कूलः, बरारी, भागलपुरः। बिहारराज्यस्थडीएवीपब्लिक स्कूलबरारीभागलपुरविद्यालये द्वादशकक्षायाः छात्र-छात्राणां सत्रान्तसमारोहः कक्षा एकादशकक्षायाः विद्यार्थिभिः अत्यन्तं उत्साहपूर्णेन वातावरणेन आयोजितः अभवत्। कार्यक्रमस्य शुभारम्भः वैदिकपरम्परानुसारं हवनकर्मणा अभवत्, यस्मिन् द्वादशकक्षायाः सर्वे छात्र-छात्राः स्वस्य उज्ज्वलभविष्यस्य कामनया आहुतिं समर्पितवन्तः। हवनानन्तरं विविधसांस्कृतिककार्यक्रमेषु यत्र एकादशकक्षायाः छात्र-छात्राभिः नृत्यस्य, संगीतस्य, नाट्यकलायाश्च माध्यमेन स्वप्रतिभायाः उत्कृष्टं प्रदर्शनं कृत्वा समारोहस्य शोभा वर्धिता। सम्पूर्णं वातावरणं उल्लासेन, भावुकतया, आत्मीयतया च परिपूर्णम् आसीत्। अस्मिन् अवसरे विद्यालयस्य प्राचार्यः सह सहायकक्षेत्रीयाधिकारी श्री अनिल कुमारः छात्रान् सम्बोधयन् अवदत् यत् जीवनस्य लक्ष्यं सदैव उच्चं भवेत्, तस्य प्राप्तये च निरन्तरः संघर्षः अत्यावश्यकः। असफलताभ्यः न भेतव्यम्, यतः असफलता न इयं सूचयति यत् सर्वं समाप्तम्, अपि तु सा नवीनदिशायां अधिकपरिश्रमाय प्रेरयति। अद्यतनकाले धैर्यः आत्मविश्वासश्च अत्यन्तं आवश्यकौ, येन विद्यार्थिनः अवसादादिसमस्याभ्यः स्वरक्षां कर्तुं शक्नुवन्ति। द्वादशकक्षायाः छात्रः अर्चित विजयः स्वानुभवं प्रकटयन् अवदत् यत् डीएवीविद्यालयः तं जीवनस्य महत्त्वपूर्णमूल्यानि शिक्षितवान् अस्ति, भविष्ये च सः विद्यालयस्य नाम आलोकयितुं संकल्पितः अस्ति। एवमेव छात्रा अविका शर्मा अवदत् यत् दीर्घकालपर्यन्तं विद्यालये व्यतीतानि दिनानि इदानीं तस्याः हृदये भावुकं अनुभूतिं जनयन्ति। समारोहस्य अन्ते प्राचार्यमहोदयेन द्वादशकक्षायाः सर्वेभ्यः छात्र-छात्राभ्यः स्मृतिचिह्नानि प्रदत्तानि तथा तेषां कृते उज्ज्वलभविष्याय हार्दिकाः शुभाशयाः प्रदत्ताः। अस्मिन् अवसरे रफत जहाँ खानम, पूनम सिंह, नरेन्द्रप्रकाश सिंह, आशुतोष कुमार, डॉ० चन्द्रहास भारती, पीयूष आनन्द, संजय कुमार झा, मनोज कुमार मिश्रा, आरती कौशिक, प्रमोद कुमार मण्डल, लवली कुमारी, शैलेश कुमार सिंह, डॉ० अञ्जनी कुमार अञ्जान, डॉ० घनश्याम पाठक, आशीष कुमार दास, प्रगति मिश्रा, सुजीत कुमार मण्डल, अभिषेक कुमार शर्मा इत्यादयः सर्वे शिक्षकाः, शिक्षिकाः तथा शिक्षकेत्तरकर्मचारिणः च स्वोपस्थित्या कार्यक्रमस्य शोभां वर्धितवन्तः।